# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

**प्रथमं प्रश्नपत्रम् - First Paper**

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. कयोश्चिद् द्वयोः श्लोकयोः भावार्थं स्वभाषया लिखत ।** **१०**

(१) हर्तुर्न गोचरं याति दत्ता भवति विस्तृता।
कल्पान्तेऽपि न या नश्येत् किमन्यद्विद्यया समम्।।

(२) गुणेषु यत्नः क्रियतां किमाटोपैः प्रयोजनम्।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः।

(३) भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः।
कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः।।

**प्र.२. अधोलिखितवाक्येषु केषाञ्चित् पञ्चानामुत्तरं संस्कृतभाषया लिखत ।** **१०**

(१) गङ्गायमुनयोः उद्गमः कुत्रास्ति? (२) कस्यां भाषायां भारतीयसंस्कृतिस्वरूपं निहितम्? (३) हिमालयः कस्य आवासस्थानम् आसीत्? (४) केन महत्तपं तप्त्वा गङ्गां स्वर्गात् इहानीता? (५) पुरा संस्कृतं भारतस्य कीदृशी भाषा आसीत्? (६) पुरा देवाः, गन्धर्वाः, यक्षाश्च कुत्र निवसन्ति स्म?

**प्र.३. अधोलिखितेषु पञ्चानां वाक्यानां स्वभाषयाऽनुवादं कुरुत ।** **५**

(१) धर्मेण सत्येन चाभिरक्षितः चिरंजीव। (२) सः कासारतटे स्थित्वा जलस्योर्मीन् पश्यति। (३) पुरा गोधनं जनानां मुख्यं धनम् आसीत्। (४) अस्योतुङ्गानि शिखराणि मेघाः आश्रयन्ति। (५) नानादेशात् तीर्थस्थानेषु आगत्य जनाः स्नानं कुर्वन्ति। (६) नद्याः ओघे नौकाः गच्छन्ति।

**प्र.४. एतासु लोकोक्तिषु कासाञ्चित् पञ्चानां स्वभाषया भावार्थं लिखत । ५**

(१) अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम्। (२) अल्पानामपि वस्तूनां संहतिः कार्यसाधिका। (३) अभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ? (४) अन्यः करोति व्यापारं लिप्तो भवति लेखकः। (५) असहायः पथि न गच्छेत्। (६) अस्य पापोदरस्यार्थे किमानाटि नाटकम् ।

**प्र.५. (क) अधोलिखितेषु केषाञ्चित् पञ्चानां सविग्रहं समासनाम लिखत । ५**

(१) पञ्चपात्रम्। (२) प्राप्तविद्यः। (३) तपोधनम्। (४) अतिसीमम्। (५) कर्पूरगौरः।
(६) त्रिभुवनम्।

**(ख) ''राजन्'' अथवा ''सरित्''-शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत। ५**

**प्र.६. अधोलिखितेषु केषाञ्चित् पञ्चानां शब्दानामर्थान् लिखत । ५**

(१) अधिगन्तुम्। (२) सुवर्चसम्। (३) परिचाययति। (४) आकर्णितः। (५) अनुत्तमः।
(६) गव्यम्।

**प्र.७. निम्नलिखित-वाक्येषु केषाञ्चित् पञ्चानां संस्कृतेऽनुवादं कुरुत । ५**

(१) गाय घास खाती है। (२) मैं ईश्वर का चिन्तन करता हूँ। (३) वृक्ष पर पत्ते हिल रहे हैं। (४) सब में पढ़ने की इच्छा है। (५) भक्तों की वाणी मे मधुरता रहती है। (६) कटु वाणी से कलह होता है।

(1) The cow grazes the grass. (2) I contemplate on God.
(3) The leaves are moving in the tree. (4) All are interested in study.
(5) Speeches of devotees are sweet. (6) By a harsh talk a quarrel begins.

❑ ❑ ❑

A06-Green

S-2024

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

### द्वितीयं प्रश्नपत्रम् - Second Paper

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. अधस्तनेषु द्वयोः श्लोकयोः भावार्थं स्वोत्तरभाषया लिखत ।** **१०**

(१) विकृतिं नैव गच्छन्ति सङ्गदोषेण साधवः।
आवेष्टितं महासर्पैश्चन्दनं न विषायते।।

(२) धनानि धान्यानि पटानि गेहे पापानि दु:खानि सुखानि चापि।
ज्ञानं च विद्या च कलाश्च सर्वा: ससर्ज क्षेमाय नृणां विधाता।।

(३) तत: सा तीव्रशोकार्ता प्रदीप्तेव च मन्युना।
इतश्चेतश्च रुदती पर्यधावत दु:खिता।।

**प्र.२. अधस्तनस्य गद्यखण्डस्य स्वभाषया अर्थं लिखत ।** **१०**

यथा संस्कृतं सुदीर्घकालं भारतस्य सांस्कृतिकी भाषा आसीत् तथैव मध्ययुगेषु लेटिनभाषा एशियाया: मुख्यभूमे: यूरोपस्य च सांस्कृतिकी भाषा आसीत्। यथा च भारतस्य प्रादेशिक्य: भाषा: शनै: शनै: संस्कृतस्य स्थाने स्वतन्त्रा: सांस्कृतिकभाषा: अभवन् तथैव यूरोपस्य प्रादेशिकस्य भाषा अपि लेटिनभाषाया: स्थाने स्वतन्त्रा: भाषा: अभवन्, येन मन्मतानुसारेण यूरोपस्य एकताया: हानि: जाता।

अथवा

ग्राम्या: क्षेत्रेषु कठिनं श्रमं कुर्वन्ति। ते सरलस्वभावा: नित्यं प्रसन्नचित्ताश्च भवन्ति। तेषां वेष:, भोजनं, पानं च साधारणम्। ते भक्तं, रोटिकां, सूपं, शाकानि भुञ्जते। ते गा: पालयन्ति। ते दुग्धं, दधि,नवनीतं,तक्रं,घृतं चाश्नन्ति। ते स्वस्था:,परिपुष्टा:,बलवन्तश्च भवन्ति। ग्रामा: प्रायेण नदीनां तटेषु भवन्ति। सर्वेभ्य: ग्रामेभ्य: बहि: कूपा: भवन्ति। तेषां जलं शीतलं मधुरं च भवति। ग्रामीणा: कूपजलं पिबन्ति। ते नदीषु स्नान्ति, पशून् स्नापयन्ति,तासां जलेन क्षेत्राणि च सिञ्चन्ति।



[P.T.O.]

**प्र.३. निम्नलिखितासु पञ्चानां लोकोक्तीनामर्थं स्वोत्तरभाषया लिखत ।** ५

(१) अङ्गणं शंसते वक्रं नर्तनाकुशलो जनः। (२) अस्थ्ना ताडितः श्वा नैव बुक्किष्यति।
(३) अल्पमपि छललब्धं बहुसत्यार्जितमपि प्रदूषयति। (४) अङ्गीकृतं सुकृतिनः परिपालयन्ति।
(५) अनुरागोऽनुरागेण परीक्षितव्यः। (६) अतिपरिचयादवज्ञा संततगमनादनादरो भवति।

**प्र.४. अधोलिखितशब्देषु पञ्चानामर्थं विलिख्य वाक्येषु प्रयोगं कुरुत ।** ५

(१) धारायन्त्रम्। (२) समासादिताः। (३) आकर्ण्यताम्।
(४) महेन्द्रः। (५) सरलस्वभावाः। (६) पुष्पवाटिका ।

**प्र.५. ''आयुस्'' अथवा ''अक्षि'' शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत ।** ५

**प्र.६. अधोलिखितेषु पञ्चानां शब्दानामर्थं लिखित्वा तेषां प्रत्ययान् निर्दिशत ।** ५

(१) दाशरथिः। (२) भवदीयः। (३) पठितवान्। (४) शैवः (५) अश्वकः। (६) पौराणिकः।

**प्र.७. अधोलिखितेषु पञ्चानां पदानां सन्धिविच्छेदं कुरुत ।** ५

(१) तथैव । (२) योऽधिगन्तुम् । (३) इतीव। (४) तस्यैकस्मिन् । (५) मातुश्चरणौ ।
(६) आमन्त्रितोऽहम् ।

**प्र.८. अधोलिखितवाक्येषु पञ्चानां संस्कृतभाषायामनुवादं कुरुत ।** ५

(१) माता की गोद में बच्चा खेलता है। (२) गाँव में घी, दूध, मक्खन खूब मिलता है।
(३) हवा जोर से बहती है? (४) एक वर्ष में कितने दिन होते हैं?
(५) उस गाँव में एक बड़ा कुआँ है। (६) दवाइयों से रोग नष्ट होते हैं।

(1) The child plays on the lap of the mother. (2) In the villages, ghee, milk and butter are easily available. (3) The wind blows swiftly. (4) How many days are there in a year? (5) There is a big well in that village. (6) Diseases are cured by medicines.

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

### तृतीयं प्रश्नपत्रम् - Third Paper

( समयः २.०० तः ४.०० ) ( पूर्णाङ्काः ५० )

**प्र.१. अधस्तनेषु त्रयाणां स्वोत्तरभाषया परिचयो देयः ।** १५

(१) उपनिषदः। (२) आदिकाव्यम् । (३) साहित्यम् । (४) पुराणानि।

**प्र.२. निम्नलिखितासु पञ्चानां सूक्तीनामर्थं स्वोत्तरभाषया लिखत ।** ५

(१) दुःसमयः चिरेण याप्यते।

(२) दोषः सर्वेषु विश्वासोऽथवा क्वचित्।

(३) दृढसंकल्पो विधेः प्रियः।

(४) द्रव्येण सर्वे वशाः।

(५) तावत्परिहरं कलहं परिहर्तुं शक्यते यावत्।

(६) दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम्।

**प्र.३. अधोलिखितेषु केषाञ्चित् पञ्चानां वाक्यानां शुद्धिः विधेया ।** ५

(१) राजपथा प्रासादं गच्छ। (२) वने हस्तिः धावति। (३) तां चन्द्रवदनीं विलोक्य।
(४) सर्वाः नराः खादन्ति। (५) अहं मित्रस्य सह गच्छामि। (६) निर्धनं धनं देहि।

**प्र.४. परीक्षायां सफलतायै मित्रं प्रति अभिनन्दनपत्रं लिखत ।** ५

**प्र.५. निम्नलिखितेषु कयोरपि द्वयोः छन्दसोः लक्षणमुदाहरणञ्च लिखत ।** १०

(१) द्रुतविलम्बितम्। (२) इन्द्रवज्रा। (३) मन्दाक्रान्ता ।

**प्र.६. एकमाश्रित्य संस्कृतभाषया निबन्धं लिखत ।** १०

(१) कृषकः। (२) भारतवर्षः। ३) संस्कृतभाषा ।

❑ ❑ ❑